१

काव्यशास्त्रप्रवेशः- २

प्रस्तावना

कवेः कारयित्रीप्रतिभया समुद्भूतं कर्म भवति काव्यम्। तस्य च काव्यस्य विश्लेषणाय यस्य शास्त्रस्याविर्भावः तस्य अलङ्कारशास्त्रम् इत्यभिधानम्। कविकर्मणः काव्यस्य दर्पणभूतं भवति अलङ्कारशास्त्रम्। अलङ्कारशास्त्रोक्तेन मार्गेण काव्यस्य परिशीलनेन कविः कः, प्रतिभा का, काव्यस्य लक्षणं प्रकाराः च, काव्यम् उत्तमम् अधमं कीदृशं वा, सहृदयः कः, रसः कः, काव्ये कासां गुणालङ्काररीतीनामुपयोगः, वृत्तिस्वरूपं किम् इत्यादीनां विषयाणां ज्ञानं भवति। एवम् अलङ्कारशास्त्रज्ञः एव काव्यस्य उत्तमतया परिशीलने समर्थो भवति। काव्यानुशीलनाय संस्कृतसाहित्यपरम्परायां रचितेषु अलङ्कारशास्त्रेषु आनन्दवर्धनकृतो ध्वन्यालोकः, जगन्नाथकृतः रसगङ्गाधरः, मम्मटाचार्यकृतः काव्यप्रकाशः, दण्डिरचितः काव्यादर्शः, विश्वनाथकविराजकृतः साहित्यदर्पणः, राजशेखरकृता काव्यमीमांसा, अप्पय–दीक्षितकृतः कुवलयानन्दः इत्यादयः ग्रन्थाः अत्यन्तं प्रसिद्धाः।

अलङ्कारशास्त्रमिति नामकरणम् अतीव प्राचीनम्। यस्मिन् समये इदं नामकरणम् अभवत् तदा अलङ्काराणां बहुधा प्रसिद्धिः आसीत् इति केचन कल्पयन्ति। अथवा अलङ्कारशब्दः न हि करणे घञा उत्पन्नः, अपि तु भावे घञा उत्पन्नः। अलङ्करणम् अलङ्कारः इति। अलङ्करणं नाम सौन्दयम्। तेन गुणालङ्काररीत्यादीनां सर्वासां ग्रहणम् इति केचन। अत्र तेषां प्रमाणम् – "काव्यं ग्राह्यमलङ्कारात्" इति "सौन्दर्यमलङ्कारः" इति च वचः। राजशेखरेण अलङ्कारशास्त्रमिति नाम्नः स्थाने साहित्यविद्या इति नाम स्वीकृतम्।

इदम् अलङ्कारशास्त्रं हि वैदिकलौकिकज्ञानाय अत्यन्तम् उपकारकं भवति। अत एतस्य राजशेखरेण वेदाङ्गत्वं स्वीकृतं – "पञ्चमी साहित्यविद्या इति यायावरीयः, सा च चतसृणां विद्यानां निष्यन्दरूपा।" इति।

अलङ्कारशास्त्रेषु प्रतिपादितानां केषाञ्चित् पारिभाषिकाणां शब्दानां परिचयाय अलङ्कारशास्त्रीयपदपरिचयः इति पाठस्याविर्भावः। अस्मिन् पाठे कविस्वरूपम्, कविभेदाः, प्रतिभास्वरूपम्, सहृदयस्वरूपम्, काव्यस्वरूपम्, काव्यस्य प्रयोजनानि, वृत्तिस्वरूपं तद्भेदाश्च, रसस्वरूपं तद्भेदाश्च समासेन वर्णिताः।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- कविस्वरूपं कविभेदान् च जानीयात्
- प्रतिभास्वरूपं जानीयात्।
- सहृदयस्वरूपं जानीयात्।
- काव्यस्वरूपं जानीयात्।
- काव्यप्रयोजनानि जानीयात्।
- वृत्तिस्वरूपं वृत्तिभेदांश्च जानीयात्।
- रसस्वरूपं रसभेदांश्च जानीयात्।

९.१) कविस्वरूपं कविभेदाश्च

"अपारे काव्यसंसारे कविरेकः प्रजापतिः।

यथास्मै रोचते विश्वं तथेदं परिवर्तते॥"

इति ध्वन्यालोककारस्य आनन्दवर्धनाचार्यस्य कविमाहात्म्यपरकं वचः तु सुप्रसिद्धमेव। कविः काव्यसंसारस्य प्रजापतिः भवति, स यथा निर्मातुम् इच्छति तथैव काव्यं निर्माति। स हि काव्यरसिकानां सहृदयानां परमादरणीयः। कवृ वर्णने इत्यस्माद्धातोः कविशब्दो निष्पन्नः। यः कवते स भवति कविः। कवते नाम वर्णयति इति। कीदृशं वर्णनं कविना क्रियते इति प्रश्नः समेषां मनसि उदेति। अत्रोत्तरं तावत् प्रत्यक्षीकृतस्य स्वप्रतिभया सरसया वाण्या कथनं भवति वर्णनम्। तादृशवर्णने एव कविः स्वयं रसास्वादं करोति अन्यान् कारयति च। प्रतिभा हि द्विविधा - कारयित्री भावयित्री च। तत्र कारयित्रीप्रतिभया एव कविः काव्यं निर्माति। काव्यनिर्माणाय प्रतिभया सह व्युत्पत्तिरपि अपेक्षते। कवेः काव्यरचनं न हि गगनकुसुमादिवत् मिथ्याभूतं भवति तत्र वास्तवार्थपर्यवसायित्वम् अवश्यं तिष्ठति। कविः वास्तविकार्थमेव लोकोत्तरचमत्कारसन्निवेशनेन वर्णयति। कविशब्दस्य सामान्यतः कारयित्रीप्रतिभावान् व्युत्पत्तिमान् वर्णयिता इत्यर्थः। तथाहि काव्यमीमांसायां राजशेखरः - "प्रतिभाव्युत्पत्तिमान् च कविः कविरित्युच्यते" इति। यास्काचार्यमते क्रान्तदर्शी इत्यर्थः।

काव्यमीमांसादिशा कविः त्रिविधो भवति शास्त्रकविः काव्यकविः उभयकविः चेति।

क) शास्त्रकविः - यः कविः शास्त्रीयविषयान् काव्यरूपेण प्रस्तौति स शास्त्रकविः। शास्त्रीयविषयाणां शास्त्रीयशैल्या निबद्धात् शास्त्रकविः काव्ये रससम्पद्विच्छेदं विदधाति। शास्त्रकविः पुना त्रिधा विभक्तो भवति - शास्त्रस्य रचयिता, शास्त्रे काव्यस्य निवेशयिता, काव्ये शास्त्रस्य निवेशयिता च।

ख) काव्यकविः - यः कविः वचोवैचित्र्येण शास्त्रस्थस्य तर्ककर्कशस्य अर्थस्य शैथिल्यं सम्पादयति स काव्यकविः। राजशेखरमते काव्यकविः अष्टधा विभक्तः - रचनाकविः, शब्दकविः, अर्थकविः, अलङ्कारकविः, उक्तिकविः, रस-कविः, मार्गकविः तथा शास्त्रार्थकविः।

ग) उभयकविः – यः कविः स्वानुभवस्य आधारेण शास्त्रीयं विषयं तथा प्रस्तौति यथा शास्त्रीयरूपेण सह काव्यरूपमपि धरति स उभयकविः।

पाठगतप्रश्नाः – १

१. कविशब्दः कस्माद् धातोः उत्पन्नः?

२. कविमाहात्म्यपरकम् आनन्दवर्धनस्य किं वचः?

३. कविः कया प्रतिभया काव्यं निर्माति?

४. कविशब्दस्य यास्कनये अर्थः कः?

५. राजशेखरमते प्रतिभया सह किं काव्यनिर्माणाय अपेक्षते।

६. कवेर्लक्षणं किम्।

७. कविः कतिविधः।

८. शास्त्रकविः कः।

९. काव्यकविः कः।

१०. उभयकविः कः।

१.२) प्रतिभा

सूर्यः यथा प्रकाशनशक्तिं विना किमपि प्रकाशयितुं न समर्थ एवमेव प्रतिभां विना कविः काव्यं स्रष्टुं न समर्थः। प्रतिभायाः प्रतिभानम् इत्यपि नामान्तरम्।प्रतिभास्वरूपं किमिति चेत् भट्टतौतः -

"प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।" इति।

नवीनानाम् अर्थानां प्रकाशनसमर्था प्रज्ञा भवति प्रतिभा। प्रज्ञायाः प्रकारभूता प्रतिभा। प्रतिभा काव्यस्य निर्माणे हेतुः इति भामहः।

आचार्यो वामनः काव्यालङ्कारसूत्रवृत्तिग्रन्थे आह -

"कवित्वबीजं प्रतिभानम्" इति। कवित्वस्य बीजं भवति प्रतिभानम्। प्रतिभां विना काव्यं नैव निष्पद्यते। निष्पन्नं च काव्यम् उपहासाय कल्पते न तु यशसे।

अभिनवगुप्ताचार्याणां मते -

"अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा प्रतिभा" इति। अर्थात् नूतनस्य विषयस्य संरचने समर्था प्रज्ञा भवति प्रतिभा।

जगन्नाथस्य नये - **"काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा"** इति। काव्यघटनायां काव्यस्य निर्माणे अनुकूला शब्दार्थोपस्थितिः शब्दार्थयोः अनुकूलः विकाशो भवति प्रतिभा।

प्रतिभालक्षणं राजशेखरेण प्रोक्तं - **“या शब्दग्रामम् अर्थसार्थम् अलङ्कार-तन्त्रम् उक्तिमार्गम् अन्यदपि तथाविधम् अधिहृदयं प्रतिभासयति सा प्रतिभा।”** इति। प्रतिभा एका कविनिष्ठा विशेषशक्तिः या शब्दसमूहम् अर्थसमूहम् अलङ्कारशास्त्रम् उक्तिमार्गम् अन्यदपि काव्यतत्त्वं हृदये प्रतिभासयति। सा प्रतिभा राजशेखरमते कारयित्री भावयित्री चेति द्विविधा। तत्र कवेः काव्यरचनायाम् उपकारिका कारयित्री प्रतिभा। भावयित्री प्रतिभा तु काव्यस्यानुशीलने सहृदयानां भावुकानामुपकारिका।

एषा संस्कारजन्या प्रतिभा एव काव्यस्य कारणम् इति आलङ्कारिकाः। अत एव भामह आह -

“काव्यं तु जायते जातु कस्यचित्प्रतिभावतः।” इति।

व्युत्पत्तिः प्रतिभा च काव्यस्य कारणमिति राजशेखरः। अतस्तेनोक्तम् - **“प्रतिभाव्युत्पत्ती मिथः समवेते श्रेयस्यौ इति यायावरीयः”** इति। व्युत्पत्तिः नाम उचितानुचितविवेकः इति।

प्रतिभा व्युत्पत्तिः अभ्यासः इत्येतत्त्रयं काव्यकारणमिति मम्मटाचार्यः। अभ्यासो नाम निरन्तरं काव्यस्य निर्माणे अध्ययने वा प्रवृत्तिः। अतस्तेनोक्तं -

“शक्तिर्निपुणता लोकशास्त्राद्यवेक्षणात्।
काव्यज्ञशिक्षयाऽभ्यासः इति हेतुस्तदुद्भवे॥” इति।

रुद्रटाचार्यमते अपि ‘**प्रतिभाव्युत्पत्त्याभ्यासा: काव्यहेतु:**’ इति।

दण्डिनः मतमेवमेव –

“नैसर्गिकी च प्रतिभा श्रुतं च बहुनिर्मलम्।
अमन्दश्चाभियोगोऽस्याः कारणं काव्यसम्पदः॥” इति।

परन्तु -

“अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते कवेः।
यत्त्वशक्तिकृतस्तस्य स झटित्यवभासते॥”

इति आनन्दवर्धनाचार्यस्य मतविश्लषणेन ज्ञायते प्रतिभाशक्तिरेव काव्यस्य हेतुः। एवं प्रतिभा काव्यनिर्माणे हेतुः तत्सहायकौ व्युत्पत्त्यभ्यासौ इति मतमेव समीचीनम्।

पाठगतप्रश्नाः–२

११. भट्टतौतस्य मते प्रतिभा का।

१२. अभिनवगुप्ताचार्याणां मते प्रतिभा का।

१३. जगन्नाथनये प्रतिभालक्षणं किम्।

१४. राजशेखरनये प्रतिभालक्षणं किम्।

१५. राजशेखरनये प्रतिभा कतिविधा काश्च।

१६. व्युत्पत्तिः नाम का।

१७. अभ्यासः नाम कः।

१८. कानि काव्यस्य कारणानि मम्मटनये।

१९. वस्तुतः किं काव्यस्य कारणम्।

९.३) सहृदयः

सहृदयः भवति कविसमानहृदयः। कवेः काव्यं तदैव प्रतिष्ठां लभते यदा तत्काव्यं सहृदयहृदयम् आह्लादयति। कविवत् सहृदयस्यापि अस्ति महत्त्वम्। अत एव अभिनवगुप्तपादाः लोचनारम्भे कथयन्ति –

"सरस्वत्यास्तत्त्वं कविसहृदयाख्यं विजयते।" इति।

काव्यरूपायाः वाग्देव्याः कायस्य अंशद्वयं कविः सहृदयश्च। तत्र कवि प्रख्यावान् अर्थात् कारयित्रीप्रतिभावान्। सहृदयः उपाख्यावान् अर्थाद् भावयित्रीप्रतिभावान्। भावयित्री प्रतिभा एव कवेः श्रमम् अभिप्रायञ्च भावयति। अनया प्रतिभया एव कवेः व्यापारः सार्थक्यं याति। अन्यथा कवेः व्यापारस्तु वैफल्यमियात्। एवम् एतादृशभावयित्रीप्रतिभावान् सहृदय एव कविरचितस्य काव्यस्य आस्वादकः।

एतादृशस्य सहृदयस्य स्वरूपं लोचने आहुः अभिनवगुप्तपादाः – "येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयविषयतन्मयीभवनयोग्यता ते एव हृदयसंवादभाजः सहृदयाः।" इति। सर्वदा काव्यानुशीलनेन येषां मनः कविकाव्येषु तन्मयं भवति ते एव सहृदयाः भवन्ति। सहृदयः कविनिर्मितं काव्यं शृण्वन् तन्मयो भूत्वा कविसदृश एव रसमग्नो भवति। कविः काव्यरचनेन काव्यरसास्वादे स्वतन्त्रतां भजते। किन्तु सहृदयः कविवर्ण्यमानं शृण्वन् रसास्वादं करोतीति स काव्याधीनः। सहृदयस्य भावुकः, रसिकः, भावकः, सचेताः इत्यादीनि नामान्तराणि।

पाठगतप्रश्नाः – ३

२०. सहृदयलक्षणं किम्।

२१. सरस्वत्याः तत्त्वद्वयं किम्।

२२. सहृदयः कीदृक्प्रतिभावान्।

२३. सहृदयस्य नामान्तराणि कानि।

९.४) काव्यम्

कवेः कर्म इत्यर्थे कविशब्दात् कर्मण्यर्थे "गुणवचनब्राह्मणदिभ्यः कर्म च" इति सूत्रेण ष्यञ्प्रत्यये काव्यशब्दो निष्पद्यते। कवेः कारयित्रीप्रतिभासमुद्भूतं कर्म भवति काव्यम्।

तस्य काव्यस्य किं लक्षणम् इति चेद् आलङ्कारिकैः काव्यस्य बहूनि लक्षणानि प्रोक्तानि। तत्राग्निपुराणे यथा -

"संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।

काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्॥" इति।

अर्थाद् इष्टार्थव्यवच्छिन्ना पदावली काव्यम् इति। इष्टार्थः नाम चमत्कृतिबहुलः लोकोत्तराह्लादजनकः अर्थः। तादृशव्यवच्छिन्नः पदसमूह एव काव्यम्। अत्र स्फुरदलङ्कारमित्यादिकं प्रशस्तिवचनं न तु स्वरूपकथनम्।

एतदेव दण्डिनोक्तं - "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।" इति।

आनन्दवर्धनाचार्यनये तु - "सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्य-लक्षणम्" इति। सहृदयानां हृदयानि आह्लादयतः यौ शब्दार्थौ तन्मयमेव काव्यम्।

भामहमते काव्यलक्षणं तावत् - "शब्दार्थौ सहितौ काव्यम्" इति। शब्दार्थौ सहितौ लोकोत्तरचमत्कारकारकधर्मेण संयुक्तौ भवति काव्यम्।

वामननये तु - "काव्यं ग्राह्यमलङ्कारात्। काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते। भक्त्या तु शब्दार्थमात्रवचोऽत्र लभ्यते।" इति। अत्रापि शब्दार्थयोरेव काव्यत्वं स्वीकृतम्।

आलङ्कारिकभोजनये तु - "निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।" इति। दोषरहितं गुणवत् अलङ्कारालङ्कृतं वाक्यं भवति काव्यम्।

आचार्यमम्मटस्तु - "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति। दोषरहितौ गुणसहितौ सर्वत्र सालङ्कारौ क्वचिदलङ्कारविरहितौ अपि शब्दार्थौ काव्यम् इति।

जगन्नाथो रसगङ्गाधरे - "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति। रमणीयः यः अर्थः तस्य प्रतिपादकः शब्दो भवति काव्यम्। रमणीयता नाम लोकोत्तर आनन्दः। रमणीयः नाम लोकोत्तरानन्दस्य जनकः। धनं ते दास्यामि पुत्रस्ते जातः इत्यादिवाक्यैः जन्य आनन्दो लौकिक एव भवति, न स लोकोत्तरः। एवं लोकोत्तरानन्दजनकस्य अर्थस्य प्रतिपादकः शब्दो वाक्यं भवति काव्यम् इति।

विश्वनाथकविराजो दर्पणे - "वाक्यं रसात्मकं काव्यम्" इति। रसाभावतदाभासाः आत्मानः यस्य तादृशं वाक्यं भवति काव्यम्।

ननु वाक्यं कीदृशं भवति इति चेदाह विश्वनाथः-

"वाक्यं स्याद्योगताकाङ्क्षासत्तियुक्तः पदोच्चयः।" इति। तादृशः पदोच्चयः पदसमूहः वाक्यं भवति यस्मिन् पदसमूहे योग्यता आकाङ्क्षा आसत्तिश्च तिष्ठति।

अत्र पदं नाम किमिति चेदुच्यते -

"वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।" इति। प्रयोगार्हः अनन्वितैकार्थबोधकः वर्णसमूहः पदम्।

पदार्थानां परस्परसम्बन्धे बाधाभावः योग्यता। पदार्थानाम् अभिधादिभिः वृत्तिभिः पदप्रतिपाद्यमानानाम् अर्थानां परस्परसम्बन्धे परस्परान्वयबोधे बाधाभावः प्रतिबन्धकाभावः योग्यता। यथा - कृष्णो नगरं याति। किन्तु वह्निना सिञ्चति इत्यादौ परस्परसम्बन्धे वह्निना सेको न शक्यः इति बाधस्य सत्त्वात् योग्यताभावात् न वाक्यत्वम्।

पदानां पदान्तरसापेक्षता भवति आकाङ्क्षा। अत एव निराकाङ्क्षस्य गौः अश्वः पुरुषः इत्यस्य न वाक्यता।

आसत्तिर्नाम पदार्थोपस्थितेः अव्यवधानम्। तेन देवदत्तः इति पदस्य दिनान्तरोच्चारितेन गच्छतीति इत्यनेन सङ्गतौ वाक्यता न भवति।

एवं केचन भामहमम्मटादयः आलङ्कारिकाः शब्दार्थयोः प्राधान्येन, केचन दण्डि-जगन्नाथ-कविराजादयः च शब्दस्य प्राधान्येन काव्यलक्षणं प्रोक्तवन्तः। तत्र यथामति लक्षणं ग्राह्यम्। कारणं सर्वाणि एव लक्षणानि स्ववैशिष्ट्यं धारयन्ति।

तच्च काव्यं ध्वनिकाव्यं गुणीभूतव्यङ्ग्यं चेति द्विविधम्। ततः दृश्यश्रव्यभेदेन पुनः द्वैविध्यं तस्य। एवं तस्य भेदानां विषये अधिकज्ञानाय दर्पणादिग्रन्था द्रष्टव्याः।

पाठगतप्रश्नाः–४

२४. काव्यशब्दे कः शब्दः कः प्रत्ययश्च।

२५. काव्यशब्दनिष्पत्तौ किं सूत्रम्।

२६. अग्निपुराणोक्तं काव्यलक्षणं किम्।

२७. दण्डिप्रोक्तं काव्यलक्षणं किम्।

२८. भामहप्रोक्तं काव्यलक्षणं किम्।

२९. आनन्दवर्धनोक्तं काव्यलक्षणं किम्।

३०. जगन्नाथोक्तं काव्यलक्षणं किम्।

३१. मम्मटस्य काव्यलक्षणं किम्।

३२. विश्वनाथस्य काव्यलक्षणं किम्।

३३. वाक्यलक्षणं दर्पणनये किम्।

३४. पदलक्षणं दर्पणनये किम्।

३५. आकाङ्क्षा का।

३६. योग्यता का।

३७. आसत्तिः का।

१.५) काव्यप्रयोजनम्

"प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" इति उक्तिस्तु सुप्रसिद्धा एव। ननु एतादृशस्य काव्यस्य निर्माणे किं प्रयोजनम् इति प्रश्नः समेषां मनसि आयाति। तत्र काव्यतत्त्वज्ञा आलङ्कारिकाः बहुधा काव्यस्य प्रयोजनानि प्रोक्तवन्तः। तत्र काव्यप्रकाशकारस्य मम्मटाचार्यस्य इदं मतं तावत् -

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥" इति।

यशसे, अर्थकृते, व्यवहारविदे, शिवेतरक्षतये, सद्यः परनिर्वृतये कान्तासम्मिततया उपदेशयुजे च काव्यं भवति। काव्यं कीर्तिं जनयति, अर्थं प्रददाति, व्यवहारज्ञानं च ददाति। काव्यद्वारा भगवन्नारायणादीनां पूजनेन शिवेतरस्य अमङ्गलस्य प्रशमनं भवति। काव्यं श्रवणेन ब्रह्मानन्दसहोदरं रसं जनयति। काव्यं भवति कान्तासम्मितं वचः। वेदाः प्रभुसम्मिताः भवन्ति। ते प्रभुवत् सत्यं वद धर्मं चरेत्यादिकम् उपदिशन्ति। परन्तु काव्यं प्रिया इव भवति। प्रिया अर्थाद् भार्या यथा मधुराभिः वाग्भिः भर्तुः कृत्याकृत्यविवेकं जनयति तथैव काव्यं सरसया शैल्या रामादिवद् वर्तितव्यम्, न रावणादिवत् इत्यादिकृत्याकृत्यविवेकं जनयति।

एवमेव विश्वनाथः कथयति -

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।

काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥" इति। चतुर्वर्गो नाम धर्मः अर्थः कामः मोक्षः। भगवन्नारायणस्तवादिना "एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति" इत्यादिना वचनेन च काव्याद् धर्मप्राप्तिः। अर्थप्राप्तिः तु यथा श्रीहर्षनाम्ना रत्नावलीनाटिकानिर्माणेन धावकः बहूनि धनानि लब्धवान्। कामप्राप्तिश्च धनैरेव भवति। मोक्षप्राप्तिः काव्यजन्यस्य धर्मादिफलस्य अनुसन्धानाभावात् भवति। किञ्च, मोक्षोपयोगिवाक्येषु व्युत्पत्तिकारकं भवति काव्यम्। एवं चतुर्वर्गफलप्रापकं काव्यम्।

एवमेवाह भामहाचार्यः -

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।

करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥" इति।

चतुर्वर्गफलप्राप्तिः वेदादिशास्त्रेभ्यः नीरसतया भवति काव्यात् तु सरसतया इति काव्यस्य विशेषः। यतो हि रोगस्य प्रशमनं कटुकौषधेन भवतु इत्यस्यापेक्षया सितशर्करायोगेन एव सर्वे वाञ्छन्ति।

काव्यं धर्मादिसाधनोपायतया उत्कृष्टहेतुः। तथाह्याह अग्निपुराणे व्यासः -

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा॥" इति।

एवं समीक्षणेन आयाति यत् पुरुषार्थबोधः रसास्वादः चेति काव्यस्य मुख्यं प्रयोजनद्वयम्। बोधस्य रसास्वादस्य च मध्ये रसास्वाद एव काव्यस्य प्रधानं प्रयोजनम्। अत आह महिमभट्टः -

"काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्।" इति।

पाठगतप्रश्नाः – ५

३८. मम्मटाचार्यनये काव्यप्रयोजनं किम्।

३९. विश्वनाथनये काव्यप्रयोजनं किम्।

४०. काव्यात् शिवेतरक्षतिः कथं भवति।

४१. भामहाचार्यनये काव्यं किं करोति।

४२. अग्निपुराणे काव्यविषय किमुक्तम्।

४३. काव्यस्य प्रयोजनद्वयं किम्।

४४. काव्यस्य सर्वापेक्षया किं मुख्यं प्रयोजनम्। तत्र च प्रमाणं किम्।

९.६) वृत्तिस्वरूपम्

शब्दः प्रतिपादकः भवति अर्थश्च प्रतिपाद्यो भवति। शब्दो हि त्रिविधः - वाचकः लाक्षणिकः व्यञ्जकश्चेति। शब्दस्य त्रैविध्याद् अर्थः अपि त्रिविधः - वाच्यः लक्ष्यो व्यङ्ग्यश्चेति। शब्दः येन व्यापारेण अर्थं बोधयति स व्यापारो वृत्तिः। एवञ्च शब्दनिष्ठः अर्थबोधको व्यापारविशेषो भवति वृत्तिः। वृत्तेः शक्तिः इत्यपि व्यवहारो विश्वनाथेन क्रियते। तत्र शक्तिः त्रिविधा - अभिधा लक्षणा व्यञ्जना चेति। तत्र कारिकामाह विश्वनाथः -

"वाच्योऽभिधया बोध्यो लक्ष्यो लक्षणया मतः।

व्यङ्ग्यो व्यञ्जनया ताः स्युस्तिस्रः शब्दस्य शक्तयः॥" इति।

एवं वाच्यार्थस्य प्रतिपादिका अभिधा, लक्ष्यार्थस्य प्रतिपादिका लक्षणा व्यङ्ग्यार्थस्य च प्रतिपादिका व्यञ्जना भवति।

९.६.१) अभिधास्वरूपम्

शब्दार्थस्य प्रतिपादिकासु शक्तिषु आद्या भवति - वाच्यार्थप्रतिपादिका अभिधा। अभिधालक्षणमाह विश्वनाथः -

"तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा।" इति।

तत्र तिसृषु शक्तिषु मध्ये सङ्केतितार्थस्य सङ्केत इच्छाविशेषः तस्य विषयस्य अर्थस्य बोधनात् कथनात् अभिधा अग्रिमा प्रथमा भवति। सङ्केतितः नाम सङ्केतविषयः। सङ्केतो नाम कः इति चेदाह गदाधरभट्टाचार्यः -

"इदं पदमिमम् अर्थं बोधयतु इति अस्मात्पदाद् अयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः" इति।

एवमेव सङ्केतः स्वाभाविको व्यापार इति मीमांसकाः। सङ्केतादेव पदपदार्थयोः मध्ये नियतः वाच्यवाचकसम्बन्धः सिध्यति। वाच्यवाचकसम्बन्धसत्त्वादेव वह्निशब्दः समयरूपार्थं न बोधयति। एवं सामान्यतः सङ्केतितार्थो नाम वाच्यः शक्यो वा मुख्यार्थः। तस्य बोधनात् स्वज्ञानेन शाब्दबोधजननात् आद्या अभिधाशक्तिः।

तस्य सङ्केतग्रहस्य के उपायाः इति प्रश्नः समुदेति। सङ्केतग्रहस्य तत्र प्रसिद्धा कारिका तावत् -

शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥ इति।

तत्र व्याकरणादिभ्यः सङ्केतग्रहस्य क्रमश उदाहरणानि प्रस्तूयन्ते -

क) व्याकरणात् सङ्केतग्रहस्य उदाहरणं - पाचकः इति। अत्र पच्धातोः कर्तरि ण्वुल्प्रत्ययेन पाचकशब्दस्य पाककर्तरि सङ्केतबोधः भवति।

ख) उपमानात् सङ्केतग्रहस्य उदाहरणं - गोसदृशो गवयः इति। गोसदृशः गवयः इत्युपमानाद् गवयदर्शनेन अयं गोसदृशः अतः गवयपदवाच्यः इति सङ्केतग्रहो भवति।

ग) "विष्णुर्नारायणः कृष्णः" इत्यमरकोशात् नारायणादिशब्दानां विष्णौ सङ्केतो गृह्यते।

घ) "अयम् अश्वशब्दवाच्यः" इत्याप्तवाक्यात् बालः अयं पशुः अश्वशब्दबोध्यः इति सङ्केतमवधारयति।

ङ) व्यवहारतः सङ्केतग्रहो यथा - उत्तमवृद्धेन मध्यमवृद्धम् उद्दिश्य गामानय इति उक्तम्। तदा मध्यमवृद्धः गाम् आनयति। तं गवानयनप्रवृत्तं दृष्ट्वा बालकः वाक्यस्य सास्नादिमत्पिण्डानयनमर्थः इति जानाति। ततः गां बधान इत्युक्ते मध्यमवृद्धः गां बध्नाति। एवम् आवापोद्वापाभ्यां बालकः गोशब्दस्य सास्नादिमान् अर्थः इति सङ्केतम् अवधारयति।

च) वाक्यशेषात् सङ्केतग्रहो यथा - "यवमयश्चरुर्भवति" इति श्रुतौ यवशब्दस्य दीर्घशूके प्रियङ्गौ वा प्रयोग इति संशयः। तत्र -

"वसन्ते सर्वशस्यानां जायते पत्रशातनम्।

मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः॥" इति विध्यर्थकाकाङ्क्षायाः प्रवर्तमानाद् वाक्यशेषात् दीर्घशूके यवशब्दस्य सङ्केतग्रहः।

छ) विवृतिर्नाम विवरणम्। विवरणात् शक्तिग्रहो यथा - "हरिः वासुदेवः" इति। अत्र अश्वाद्यनेकार्थकतया हरिशब्दस्यार्थः क इति संशये वासुदेवः इति विवरणाद् हरिशब्दस्य वासुदेवे सङ्केतग्रहो भवति।

ज) सिद्धपदस्य सान्निध्यात् सङ्केतग्रहो यथा - "इह प्रभिन्नकमलोदरे मधूनि मधुकरः पिबति" इति। मधुकरशब्दस्य भ्रमरः मधुमक्षिका वा अर्थ इति संशये कमलपदसान्निध्यात् मधुकरशब्दस्य भ्रमरे सङ्केतग्रहः।

स च सङ्केतः जातौ गुणे द्रव्ये क्रियायां च गृह्यते। अत आह दर्पणकारः -

"सङ्केतो गृह्यते जातौ गुणद्रव्यक्रियादिषु।" इति।

१.६.२) लक्षणास्वरूपम्

लक्ष्यार्थप्रतिपादिका भवति लक्षणा। तस्याः किं स्वरूपमिति चेदाह विश्वनाथः -

"मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते।

रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥" इति।

मुख्यार्थबाधे मुख्यार्थस्य अभिधाप्रतिपाद्यस्यार्थस्य बाधे रूढेः रूढिनिमित्तात् प्रयोजनात् प्रयोजननिमित्ताद् वा यया वृत्त्या तद्युक्तः मुख्यार्थसम्बन्धयुक्तः अन्यः अर्थः मुख्यार्थाद् भिन्नार्थः प्रतीयते ज्ञायते, असौ सा अर्पिता आरोपिता स्वाभाविकेतरा शक्तिः वृत्तिः लक्षणानामिका। वक्तुः प्रयोजननिमित्ताद् रूढिनिमित्ताद् वा मुख्यार्थस्य बाधो भवति।

एवम् इयं लक्षणा **रूढिमूला प्रयोजनमूला** चेति द्विविधा। तत्र रूढिः नाम प्रसिद्धिः। रूढिमूला यथा - कलिङ्गः साहसिकः इति। अत्र साहसिकत्वधर्मः चेतने एव सम्भवति। अचेतने कलिङ्गनामकदेशविशेषे न सम्भवतीति कलिङ्गशब्दस्य मुख्यार्थबाधः। तदा रूढिवशात् कलिङ्गशब्दः कलिङ्गदेशवासी इत्यर्थं लक्षणया प्रतिपादयति। तेन कलिङ्गदेशस्थः साहसिकः इत्यर्थः सम्भवति।

प्रयोजनमूलाया लक्षणाया उदाहरणं यथा गङ्गायां घोषः इति। अत्र गङ्गाशब्दस्य जलप्रवाहविशेषो मुख्यार्थः। तत्र घोषः ग्रामः नैव सम्भवतीति गङ्गाशब्दस्य जलप्रवाहरूपस्य मुख्यार्थस्य बाधः। ततो बाधितो गङ्गाशब्दो वक्तृतात्पर्यसिद्धये जलप्रवाहयुक्तं तीररूपमर्थं लक्षणया बोधयति। गङ्गानिष्ठाः शीतत्वपावनत्वादयः धर्माः घोषे अपि सन्ति इति प्रयोजनम्। अयं प्रयोजनभूतार्थो व्यञ्जनया प्रतिपाद्यते इति विशेषः।

द्विविधा च लक्षणा पुनः **उपादानलक्षणा लक्षणलक्षणा** चेति द्विविधा। तत्र उपादानलक्षणाया लक्षणम् -

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।

स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥" इति।

यया लक्षणावृत्त्या वाक्यार्थे अन्वयसिद्धये मुख्यार्थस्य इतराक्षेपो मुख्यार्थनिष्ठधर्मभिन्नधर्माविच्छन्नस्य आक्षेपो भवति, मुख्यार्थस्य च ग्रहणं भवति सा उपादानलक्षणा। तस्या उदाहरणं यथा श्वेतो धावति इति। श्वेतशब्दस्य गुणवाचकत्वात् तस्य धावनक्रियायाम् अनन्वयात् मुखार्थबाधो भवति। तदा उपादानलक्षणया श्वेतशब्दस्य श्वेतवर्णविशिष्टः अश्वः इत्यर्थः स्वीक्रियते। ततः अश्वस्य श्वेतवर्णस्य च धावनक्रियायामन्वयः सिध्यति।

लक्षणलक्षणाया लक्षणम् -

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।

उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥" इति।

यया लक्षणावृत्त्या वाक्यार्थे परस्य मुख्यार्थभिन्नस्य अन्वयसिद्धये स्वस्य मुख्यार्थस्य अर्पणं त्यागो भवति उपलक्षणहेतुत्वात् स्वार्थत्यागप्रयोजकतया हेतुत्वाद् एषा लक्षणलक्षणा। तस्या उदाहरणं गङ्गायाः घोषः इत्येव। तत्र गङ्गापदस्य जलप्रवाहरूपार्थस्य सम्पूर्णतः त्यागात् तत्र उपलक्षणलक्षणा।

एवमेव लक्षणायाः सारोपा साध्यवसानाः इत्यादयः बहवः अवान्तरप्रकाराः सम्भवन्ति।

१.६.३) व्यञ्जनास्वरूपम्

व्यङ्ग्यार्थप्रतिपादिका भवति व्यञ्जना। तस्याः किं स्वरूपमिति चेदाह विश्वनाथः -

"विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।

सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥" इति।

"शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः" इति नयेन अभिधालक्षणादिवृत्तिषु स्वं स्वम् अर्थं प्रतिपाद्य विरतासु यया शक्त्या अपरः वाच्यार्थलक्ष्यार्थाभ्यां भिन्न एव अर्थो बोध्यते सा वृत्तिः शब्दस्य अर्थस्य प्रकृतिप्रत्ययादेश्च व्यञ्जनानामिका। एवं व्यञ्जना तु अभिधालक्षणादिसकलवृत्तिभ्यो व्यतिरिक्ता आलङ्कारिकप्रपञ्चे सुप्रसिद्धा नूतना काचन वृत्तिः।

यथा उदाहरणं - गतोऽस्तमर्कः इति। अत्र क्रीडन्तं बालकं प्रति पितुः उक्तौ गृहं गच्छ इत्यर्थो व्यञ्जनया बोध्यते। स च व्यङ्ग्यार्थो ध्वनिः प्रतीयमानार्थो गम्य इति च व्यवह्रियते।

एतादृशस्य अनुभवसिद्धस्य अर्थस्य प्रतिपादनाय एव व्यञ्जना वृत्तिः। तस्याः वृत्तेः आविर्भावः आनन्दवर्धनाचार्यस्य ध्वन्यालोकनामके ग्रन्थे प्रथमं दृश्यते।

सा च वृत्तिः - अभिधामूला लक्षणामूला चेति द्विविधा। तत्र अभिधामूलाया लक्षणं तावत् -

"अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।

एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया॥" इति।

अभिधया संयोगाद्यैः शब्दस्य संयोगाद्यैः एकस्मिन्नर्थे नियन्त्रिते, अन्यधीहेतुः व्यञ्जना अभिधामूला भवति।

संयोगाद्यैः इत्यत्रादिपदेन विप्रयोगादयः गृह्यन्ते। के शक्तिनियामकाः संयोगादयः इति चेत्कारिका -

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।

अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥

सामर्थ्यमौचिती देशो कालो व्यक्तिः स्वरादयः।

शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति।

शब्दार्थस्य अनवच्छेदे सति संयोगादयः तन्नियामकाः भवन्ति। संयोगादीनां क्रमेणोदाहरणानि प्रस्तूयन्ते -

क) संयोगे उदाहरणं तावत् सशङ्खचक्रो हरिः इति। हरिशब्दः विष्णुयमादिनानार्थवाचकः। परन्तु अत्र शङ्खचक्रसम्बन्धात् हरिशब्दो विष्णवर्थे नियम्यते।

ख) विप्रयोगे अशङ्खचक्रो हरिः इत्युदाहरणम्। हरिशब्दस्य नानार्थवाचकत्वे अपि शङ्खचक्रसहितस्य एव विप्रयोगात् हरिशब्दः विष्णवर्थे नियम्यते।

ग) साहचर्ये उदाहरणं तावद् भीमार्जुनौ इति। “अर्जुनः ककुभे पार्थे कार्तवीर्यमयूरयोः” इत्यादिकोषात् अर्जुनशब्दस्य पार्थः कार्तवीर्यार्जुनः वा इत्याद्यर्थसन्देहे भीमसाहचर्याद् अर्जुनः पार्थः।

घ) विरोधितायां कर्णार्जुनौ इत्युदाहरणम्। अत्रापि अर्जुनशब्दस्य नानार्थस्य कर्णेति विरुद्धपदसाहचर्यात् पार्थार्थे शक्तिः।

ङ) अर्थो नाम प्रयोजनम्। अर्थे भवच्छिदे स्थाणुं वन्दे इत्युदाहरणम्। स्थाणुशब्दस्य शङ्करप्रस्तरखण्डादिनानावाचकस्य भवच्छेदरूपप्रयोजनबलात् शङ्करार्थे शक्तिः।

च) प्रकरणे उदाहरणं भवति सर्वं जानाति देवः इति। अत्र देवपदेन सुरनृपयोः सन्देहे राजप्रकरणात् देवशब्दो नृपपरकः।

छ) लिङ्गं नाम धर्मः। अत्रोदाहरणं कुपितो मकरध्वजः इति। मकरध्वजशब्दस्य कामदेवसमुद्रवाचकस्य कोपरूपप्राणिधर्मात् लिङ्गात् कामदेवार्थे शक्तिः।

ज) अन्यशब्दसन्निधौ देवः पुरारिः इत्युदाहरणम्। पुरारिशब्दः खले महादेवे च वर्तते। अत्र देवपदसान्निध्यात् पुरारिशब्दस्य महादेवार्थेत शक्तिः नियम्यते।

झ) सामर्थ्ये उदाहरणं मधुना मत्तः पिकः इति। मधुशब्दः मद्यार्थे वसन्तार्थे च वर्तते। तत्र मद्येन पिकमदस्याप्रसिद्धत्वात् सामर्थ्यात् मधुशब्दः वसन्तवाचकः।

ञ) औचित्यामुदाहरणं तावत् यातु वो दयितामुखम् इति। मुखशब्दस्य नानार्थपरकस्य अत्र औचित्यात् सांमुख्ये शक्तिः।

ट) देशः नाम स्थानम्। अत्रोदाहरणं विभाति गगने चन्द्रः इति। चन्द्रशब्दः इन्द्रे कर्पूरे शशिनि च वर्तते। अत्र गगनरूपदेशात् चन्द्रशब्दस्य शशिनि शक्तिः नियम्यते।

ठ) काले दाहरणं निशि चित्रभानुः इति। चित्रभानुः सूर्यो वह्नि वा इति सन्देहे निशाकालात् चित्रभानुशब्दस्य वह्नौ शक्तिः नियम्यते।

ड) व्यक्तिर्नाम लिङ्गम्। तत्रोदाहरणं भाति रथाङ्गम् इति। रथाङ्गशब्दः चक्रपरकः चक्रवाकपक्षिपरकश्च। अत्र नपुंसकलिङ्गात् रथाङ्गशब्दस्य चक्रे शक्तिः नियम्यते। एवमेव स्वरादयः शब्दार्थस्य नियामका भवन्ति।

अभिधामूलाया उदाहरणं तावत्-

दुर्गालङ्घितविग्रहो मनसिजं सम्मीलयश्चेतसा

प्रोद्यद्राजकलो गृहीतगरिमा विश्वग्वृतो भोगिभिः।

नक्षत्रेशकृतेक्षणो गिरिगुरौ गाढां मतिं धारयन्

गामाक्रम्य विभूतिभूषिततनू राजत्युमावल्लभः॥ इति।

अत्र उमावल्लभः शिवः उमानामिकाया राजमहिष्याः स्वामी भानुदेवनृपो वा इति सन्देहे प्रकरणेन अभिधया उमावल्लभशब्दस्य उमानामिकाया राजमहिष्याः स्वामी भानुदेवनृपः इत्यर्थ आयाति। ततः अभिधामूलया व्यञ्जनया गौरीवल्लभः शिवः इत्यर्थः स्वीक्रियते। एवम् उमानामिकायाः राजमहिष्याः स्वामी भानुदेवः गौरीपतिः शिवः इव इति फलति।

लक्षणामूलाया व्यञ्जनाया उदाहरणं तावत् -

"लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम्।

यया प्रत्यायते सा स्याद् व्यञ्जना लक्षणाश्रया॥" इति।

यस्य प्रयोजनस्य कृते लक्षणा उपास्यते तत् प्रयोजनं यय बोध्यते सा लक्षणामूला व्यञ्जना भवति।

यथा गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य गङ्गातीरे प्रयोजनलक्षणा। एवं लक्षणा विरता। लक्षणायां शीतत्वपावनत्वाद्यतिशयः प्रयोजनं भवति। सा प्रयोजनं व्यञ्जनया बोध्यते। अतो व्यञ्जना लक्षणामूला भवति।

इतः अपि शाब्दी आर्थी इत्यादयः व्यञ्जनाया नैके प्रकारा भवन्तीत्यलं विस्तरेण।

पाठगतप्रश्नाः – ६

४५. शब्दः कतिविधः, के च ते।

४६. अर्थः कतिविधः, के च ते।

४७. वृत्तिः नाम का।

४८. वृत्तेः कति भेदाः, के च ते।

४९. अभिधालक्षणं किम्।

५०. गदाधरनये सङ्केतः कः।

५१. सङ्केतः कुत्र कुत्र गृह्यते।

५२. लक्षणास्वरूपं किम्।

५३. रूढिमूलाया लक्षणायाः किमुदाहरणम्।

५४. प्रयोजनमूलाया लक्षणायाः किमुदाहरणम्।

५५. उपादानलक्षणा का।

५६. लक्षणलक्षणा का।

५७. उपादानलक्षणायाः किमुदाहरणम्।

५८. लक्षणलक्षणायाः किमुदाहरणम्।

५९. व्यञ्जनास्वरूपं किम्।

६०. व्यञ्जना सामान्यतः कतिविधा, के के।

६१. शक्तिनियामकप्रतिपादिकां कारिकां वर्णयत।

१.७) रसस्वरूपम्

काव्यस्य परमं प्रयोजनं रसास्वादः। स च रसः कः इति प्रश्नः समुदेति। अस्योत्तरं तावत् रस्यते आस्वाद्यते इति रसः। अर्थात् काव्यनाट्यादिकलासु परमास्वाद्यो हि रसः। अयमेव रसः काव्यात्मेति प्रतिष्ठितः। अस्यैव उन्मेषाय कवयः चेष्टन्ते। सहृदयाश्च अमुमेव काव्याध्ययनेन आस्वादयन्ति। “न हि रसादृते कश्चिदर्थः प्रवर्तते” इति भरतमुनिवचनं रसस्य काव्यात्मत्वं प्रतिष्ठापयति।

तस्य रसस्य स्वरूपपरकं सूत्रं तावद् - **“विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः”** इति। विभावस्य अनुभावस्य व्यभिचारिणः च संयोगात् रसस्य निष्पत्तिः।

को विभावः इति प्रश्ने उत्तरं तावद् विभाव्यन्ते लोकोत्तरत्वेन सहृदयहृदये आस्वादयोग्याः क्रियन्ते रत्यादिस्थायिभावाः येन स रामकृष्णादिः काव्ये निवेशितः सन् विभावः भवति। दर्पणे विभावलक्षणम्-

रत्याद्युद्बोधकाः लोके विभावाः काव्यनाट्ययोः। इति।

अनुभावः क इति चेद् अनुभावयति रत्यादीन् स्थायिनो भावान् इत्यनुभावः। अर्थाद् विभावादिगतचेष्टा अनुभावः। तल्लक्षणं दर्पणे -

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥इति।

को नाम व्यभिचरति अस्थिरतया तिष्ठति इति निर्वेदप्रभृतिः व्यभिचारिभावः। स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादिः प्रादुर्भावतिरोभावाभ्याम् आभिमुख्येन चरति इति व्यभिचारिभावः भवति। व्यभिचारिणः तावत् - निर्वेदः, आवेगः, दैन्यम्, श्रमः, मदः, जडता, औग्र्यम्, मोहः, विबोधः, स्वप्नः, अपस्मारः, गर्वः, मरणम्, अलसता, अमर्षः, निद्रा, वहित्थः, औत्सुक्यम्, उन्मादः, शङ्का, स्मृतिः, मतिः, व्याधिः, सन्त्रासः, लज्जा, हर्षः, असूया, विषादः, धृतिः, चपलता, ग्लानिः, चिन्ता वितर्कश्च।

विभावानुभावव्यभिचारिणां संयोगे सति स्थायिभावः रसत्वं प्राप्नोति इति सूत्रस्याशयः। रतिशोकादिभावः रसत्वप्राप्तेः पूर्वपर्यन्तं स्थिरत्वेन एव तिष्ठति। अतः रतिशोकादिभावः स्थायिभावः इत्युच्यते लोके। स्थायिभावाः नव सन्ति ते तावत्-

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥" इति।

रसस्वरूपस्य व्याख्यानावसरे चत्वारो वादाः समुपलभ्यन्ते। ते तावत् - रसः उत्पद्यते इति भट्टलोल्लटस्य उत्पत्तिवादः, रसः अनुमीयते इति श्रीशङ्कुकस्य अनुमितिवादः, रसः भुज्यते इति भट्टनायकस्य भुक्तिवादः, रसः अभिव्यज्यते इति अभिनवगुप्तस्य अभिव्यक्तिवादः। एतेषु वादेषु अभिनवगुप्तस्य अभिव्यक्तिवादः एव विद्वद्भिः सिद्धान्तरूपेण स्वीकृतः।

एवं रससूत्रे अभिव्यक्तिवादानुसारेण निष्पत्तिः इत्यस्य अभिव्यक्तिः इत्यर्थः। एवं च सूत्रार्थो भवति - विभावस्य अनुभावस्य व्यभिचारिभावस्य च संयोगात् स्थायिभावः रसात्मना अभिव्यज्यते इति। अतः अभिव्यक्तिवादसमर्थकः विश्वनाथकविराज आह -

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।

रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥" इति।

वस्तुतस्तु चिन्त्यमाने रसाः आस्वाद्यन्ते इति तु प्रयोगो न भवति। यतो हि आस्वाद एव रसः। अत आह अभिनवगुप्तः - "रसाः प्रतीयन्ते इति तु ओदनं पचति इतिवद् व्यवहारः।" इति। रसस्य स्वरूपगर्भः आस्वादनप्रकारः प्रस्तुतो दर्पणकारेण-

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।

लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः

स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥" इति।

बाह्यमेयविमुखतापादकः कश्चन आन्तरो धर्मः सत्त्वम्। बाह्यमेयानि काव्याद्बहिर्भूतानि घटपटादीनि तेभ्यः विमुखतापादकः वैमुख्यप्रयोजकः धर्मः सत्त्वम्। तस्य उद्रेकात् एकः अखण्डः आनन्दस्वरूपः, अन्यज्ञेयपदार्थस्पर्शरहितः, आनन्दमयत्वाद् ब्रह्मसाक्षात्कारसदृशः, लोकोत्तरचमत्कारः प्राणो यस्य स रसः निजदेहवद् अभिन्नत्वेन कैश्चित् सहृदयैः आस्वाद्यते।

येषामेव भावानां लोके अनुभवः तेषामेव काव्ये लोकोत्तरतया अनुभवः। एतस्य कारणं भवति साधारणीकरणम्। विभावानुभावादिषु सहृदयानां मनः यथा यथा प्रवर्तते तथा तथा तन्मयता वर्धते। तदा रजस्तमसी अभिभूय बाह्यमेयविमुखतापादकस्य सत्त्वस्य उद्रेको जायते। तदा देशकालादिसकललौकिकोपाधिसम्बन्धानां क्षयः सहृदयस्य जायते। तदा विभावादयः साधारणाः निर्विशेषा भवन्ति। एष एव व्यापारः साधारणीकरणम्। तदा साधारणीकृतैः विभावादिभिः अभिव्यक्तः रत्यादिः स्थायिभावः रसत्वं प्राप्नोति। एवं साधारणीकृतविभावादिव्यक्तः स्थायिभावः रसः इत्यालङ्कारिकसमयः। पण्डितराजः जगन्नाथः "रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रस" इति भिन्नं मतं पुष्णाति। तस्य मतस्य दुरूहत्वात् नालोच्यते अत्र।

कति पुनः रसा भवन्तीति प्रश्ने स्थायिभावानां नवत्वात् नव रसा भवन्तीति उत्तरम्। ते च -

"शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।

बीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः॥" इति।

तेषां रसानां स्थायिभावानां वर्णानां देवानां च तालिका अधः प्रस्तूयते -

क्रमः	रसः	स्थायिभावः	देवता	वर्णः
१	शृङ्गारः	रतिः	विष्णुः	श्यामः
२	हास्यः	हासः	प्रमथगणः	श्वेतः
३	करुणः	शोकः	यमः	कपोतः
४	रौद्रः	क्रोधः	रुद्रः	रक्तः
५	वीरः	उत्साहः	महेन्द्रः	हेमवर्णः
६	भयानकः	भयम्	कालः	कृष्णः
७	बीभत्सः	जुगुप्सा	महाकालः	नीलः
८	अद्भुतः	विस्मयः	गन्धर्वः	पीतः
९	शान्तः	शमः	नारायणः	अतिधवलवर्णः

पाठगतप्रश्नाः–७

६२. रससूत्रं किम्।

६३. रसस्य चत्वारो वादाः कस्य कस्य के के।

६४. विभावलक्षणं किम्।

६५. अनुभावलक्षणं किम्।

६६. व्यभिचारिभावस्य लक्षणं किम्।

६७. रसविषये कस्य वादः सर्वापेक्षया श्रेष्ठः।

६८. अभिनवगुप्तमते रससूत्रस्यार्थः कः।

६९. दर्पणोक्ता रसाभिव्यक्तिकारिका।

७०. रसास्वादकारिकां लिखत।

७१. के न व्यापारेण विभावादयः निर्विशेषा भवन्ति।

७२. स्थायिभावस्य किं लक्षणम्।

७३. के स्थायिभावा भवन्ति।

७४. जगन्नाथस्य रसलक्षणं किम्।

७५. कति रसाः भवन्ति।

७६. शृङ्गारहास्यकरुणरसानां का का देवता।

७७. शृङ्गारहास्यकरुणरसानां के के वर्णाः।

७८. रौद्रवीरभयानकानां का का देवता।

७९. रौद्रवीरभयानकानां के के वर्णाः।

८०. बीभत्साद्भुतशान्तानां का का देवता।

८१. बीभत्साद्भुतशान्तानां के के वर्णाः।

पाठसारः

काव्यस्य समीचीनतया परिशीलनाय काव्योपकारकतया निर्मितम् अलङ्कारशास्त्रम्। काव्यस्य दर्पणभूतं भवति अलङ्कारशास्त्रम्। अलङ्कारशास्त्रोक्तेन मार्गेण काव्यस्य परिशीलनेन एव काव्यस्य यथार्थं ज्ञानं भवति। काव्यानुशीलनाय संस्कृतसाहित्यपरम्परायां रचितेषु अलङ्कारशास्त्रेषु आनन्दवर्धनकृतो ध्वन्यालोकः, जगन्नाथकृतः रसगङ्गाधरः, मम्मटाचार्यकृतः काव्यप्रकाशः, दण्डिरचितः काव्यादर्शः, विश्वनाथकविराजकृतः साहित्यदर्पणः, राजशेखरकृता काव्यमीमांसा, अप्पय-दीक्षितकृतः कुवलयानन्दः इत्यादयः ग्रन्थाः अत्यन्तं प्रसिद्धाः।

काव्यरसिकानां सहृदयानां परमादरणीयः कविः काव्यसंसारस्य प्रजापतिः भवति। कवृ वर्णने इत्यस्माद्धातोः कविशब्दो निष्पन्नः। यः कवते स कविः। कविः स्वप्रतिभया सरसया वाण्या वर्णयति। प्रतिभा हि द्विविधा - कारयित्री भावयित्री च। तत्र कारयित्रीप्रतिभया एव कविः काव्यं निर्माति। कविः वास्तविकार्थमेव लोकोत्तरचमत्कारसन्निवेशनेन वर्णयति। एवं कविः सामान्यतः कारयित्रीप्रतिभावान् व्युत्पत्तिवान् वर्णयिता। काव्यमीमांसादिशा कविः त्रिविधो भवति शास्त्रकविः काव्यकविः उभयकविः चेति।

सूर्यः यथा प्रकाशनशक्तिं विना किमपि प्रकाशयितुं न समर्थ एवमेव प्रतिभां विना कविः काव्यं स्रष्टुं न समर्थः। तस्याः स्वरूपं - "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।" इति भट्टतौतः। एवं प्रकारेण बहुभिः आलङ्कारिकैः प्रतिभाया बहूनि लक्षणानि प्रोक्तानि। राजशेखरमते सा प्रतिभा कारयित्री भावयित्री चेति द्विविधा। तत्र कवेः काव्यरचनायाम् उपकारिका कारयित्री प्रतिभा। भावयित्री प्रतिभा तु काव्यस्यानुशीलने सहृदयानां भावुकानामुपकारिका। प्रतिभा एव काव्यस्य कारणम् इति भामहः। व्युत्पत्तिः प्रतिभा च काव्यस्य कारणमिति राजशेखरः। व्युत्पत्तिः नाम उचितानुचितविवेकः इति। प्रतिभा व्युत्पत्तिः अभ्यासः इत्येतत्त्रयं काव्यकारणमिति मम्मटाचार्यः। अभ्यासो नाम निरन्तरं काव्यस्य निर्माणे

अध्ययने वा प्रवृत्तिः। रुद्रटस्य दण्डिनश्च नये अपि एतदेव। ध्वन्यालोकमतपर्यालोचनेन सिद्धान्तरूपेण इदं वक्तुं शक्यते यत् प्रतिभा एव काव्यस्य कारणम्। व्युत्पत्तिः अभ्यासश्च प्रतिभासहायकः।

भावयित्रीप्रतिभावान् सहृदयः। तस्य लक्षणमुक्तम् अभिनवगुप्तपादैः - "येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते एव कविहृदयसंवादभाजः संहृदयाः" इति।

ततः कविकर्म काव्यं वर्णितम्। तस्य काव्यस्य बहूनि लक्षणानि आलङ्कारिकैः प्रोक्तानि। तेषु वामनभामहमम्मटादयः शब्दार्थप्राधान्येन, केचन दण्डि-जगन्नाथ-कविराजादयः च शब्दस्य प्राधान्येन काव्यलक्षणं प्रोक्तवन्तः। अस्मिन् पाठे अग्निपुराणोक्तस्य, दण्डिप्रोक्तस्य, आनन्दवर्धनस्य, भामहस्य, वामनस्य, भोजस्य, मम्मटस्य, जगन्नाथस्य विश्वनाथकविराजस्य च काव्यलक्षणानि संगृहीतानि। तेषु विश्वनाथकविराजस्य "वाक्यं रसात्मकं काव्यम्" इत्यस्य वर्णनावसरे वाक्यस्वरूपं पदस्वरूपं च दृष्टम्। तत आकाङ्क्षा योग्यता आसत्तिश्च दृष्टा। तच्च काव्यं ध्वनिकाव्यं गुणीभूतव्यङ्ग्यं चेति द्विविधम्। ततः दृश्यश्रव्यभेदेन पुनः द्वैविध्यं तस्य इत्येवं काव्यं प्रतिपादितम्।

तस्य काव्यस्य प्रयोजनानि संगृहीतानि। मम्मटोक्तं विश्वनाथोक्तम् अग्निपुराणोक्तं च प्रयोजनमत्र संगृहीतम्। ततः सिद्धान्तरूपेण पुरुषार्थबोधो रसास्वादश्च काव्यस्य प्रयोजनमिति आगतम्। तत्रापि रसास्वाद एव परमं प्रयोजनम्।

शब्दनिष्ठः अर्थप्रतिपादको व्यापारविशेषो भवति वृत्तिः। सा च त्रिविधा - अभिधा लक्षणा व्यञ्जना चेति। तत्र वाच्यार्थबोधिका अभिधा, लक्ष्यार्थबोधिका लक्षणा, व्यङ्ग्यार्थबोधिका व्यञ्जना च भवति। तत्र अभिधा हि सङ्केतितार्थस्य बोधिका। सङ्केतस्तु जातौ गुणे द्रव्ये क्रियायां च गृह्यते। मुख्यार्थबाधे रूढेः प्रयोजनाद्वा मुख्यार्थसम्बद्धः अन्यार्थः यया बोध्यते सा अर्पिता शक्तिर्लक्षणा। सा हि रूढिमूला प्रयोजनमूला इति प्राधान्येन द्विविधा। ततः उपादानलक्षणा लक्षणलक्षणा इति चतुर्विधा। एवं लक्षणाया बहवि भेदाः सन्ति। व्यञ्जना तु अभिधाद्यासु विरतासु व्यङ्ग्यार्थप्रतिपादनाय प्रवर्तते। सा हि अभिधामूला लक्षणामूला चेति द्विविधा। अभिधामूलायाः प्रतिपादनावसरे शक्तिनियामकाः संयोगादयो वर्णिताः। एवं समासेन वृत्तिस्वरूपं प्रोक्तम्।

ततः रसस्वरूपं पर्यालोचितम्। तत्र रससूत्रस्य व्याख्यानकाले चत्वारो वादाः प्रोक्ताः। तेषु अभिनवगुप्तस्याभिव्यक्तिवादः सिद्धान्तभूतः। तत्र रससूत्रस्थानां विभावानुभावव्यभिचाराणां लक्षणानि प्रोक्तानि। ततः समीकरणं किमिति प्रोक्तम्। रसास्वादप्रकारः दर्पणकारिकादिशा प्रोक्तः। ततः स्थायिभावानां नवत्वात् नव रसाः प्रोक्ताः। तेषां सामान्यतः स्थायिभाव-वर्ण-देवतानां संग्रहरूपेण एका तालिका प्रस्तुता। एवं समासेन अस्य पाठस्य सारः प्रोक्तः।

पाठान्तप्रश्नाः

१. कविस्वरूपं कविभेदान् च वर्णयत।

२. प्रतिभास्वरूपं वर्णयत।

३. काव्योत्पत्तौ हेतुविषये मतानि वर्णयत।

४. सहृदयस्वरूपं वर्णयत।

५. काव्यस्वरूपं वर्णयत।

६. वाक्यलक्षणं वर्णयत।

७. आकाङ्क्षा-योग्यता-आसत्तिलक्षणानि वर्णयत।

८. काव्यप्रयोजनानि च वर्णयत।

९. वृत्तिस्वरूपं प्रतिपाद्य एकां वृत्तिं प्रतिपादयत।

१०. अभिधां प्रतिपादयत।

११. लक्षणां वर्णयत।

१२. सङ्केतग्रहोपायान् वर्णयत।

१३. शक्तिनियामकान् वर्णयत।

१४. व्यञ्जनां वर्णयत।

१५. रसस्वरूपं वर्णयत।

१६. रससूत्रं पर्यालोचयत।

१७. रसभेदान् वर्णयत।

१८. कविशब्दः कस्माद् धातोः - क) कुधातोः, ख) कवृधातोः, ग) कव्धातोः।

१९. कविभेदेषु नास्ति - क) शास्त्रकविः ख) स्मृतिकविः ग) काव्यकविः घ) उभयकविः।

२०. कारयित्रीप्रतिभावान् कः – क) कविः ख) सहृदयः, ग) नायकः, घ) प्रतिनायकः।

२१. प्रख्या का - क) कारयित्रीप्रतिभा, ख) भावयित्रीप्रतिभा, ग) व्युत्पत्तिः, घ) अभ्यासः।

२२. काव्यस्य किं परमं प्रयोजनम् - क) यशोलाभः, ख) पुरुषार्थबोधः, ग) रसास्वादः, घ) व्यवहारज्ञानम्।

२३. गङ्गायां घोषः इत्यत्र का लक्षणा - क) रूढिमूला, ख) प्रयोजनमूला, ग) उपादानलक्षणा।

पाठगतप्रश्नानामुत्तराणि

उत्तराणि-१

१. कविशब्दः कवृधातोः उत्पन्नः।

२. कविमाहात्म्यपरकम् आनन्दवर्धनस्य वचः-

"अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते॥" इति

३. कविः कारयित्रीप्रतिभया काव्यं निर्माति।

४. कविशब्दस्य यास्कनये क्रान्तदर्शी इत्यर्थः।

५. राजशेखरमते प्रतिभया सह व्युत्पत्तिः काव्यनिर्माणाय अपेक्षते।

६. कवेर्लक्षणं तावत् कारयित्रीप्रतिभावान् व्युत्पत्तिमान् वर्णयिता कविः।

७. कविः त्रिविधः - शास्त्रकविः, काव्यकविः उभयकविश्चेति।

८. यः कविः शास्त्रीयविषयान् काव्यरूपेण प्रस्तौति स शास्त्रकविः।

९. यः कविः वचोवैचित्र्येण शास्त्रस्थस्य तर्ककर्कशस्य अर्थस्य शैथिल्यं सम्पादयति स काव्यकविः।

१०. यः कविः स्वानुभवस्य आधारेण शास्त्रीयं विषयं तथा प्रस्तौति यथा शास्त्रीयरूपेण सह काव्यरूपमपि धरति स उभयकविः।

उत्तराणि-२

११. भट्टतौतस्य मते तु - "प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता।" इति।

१२. अभिनवगुप्ताचार्याणां मते तु - "अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा प्रतिभा" इति।

१३. जगन्नाथनये प्रतिभालक्षणं तु - "काव्यघटनानुकूलशब्दार्थोपस्थितिः प्रतिभा" इति।

१४. राजशेखरनये प्रतिभालक्षणं तु -
"या शब्दग्रामम् अर्थसार्थम् अलङ्कार-तन्त्रम् उक्तिमार्गम् अन्यदपि तथाविधम् अधिहृदयं प्रतिभासयति सा प्रतिभा।" इति।

१५. राजशेखरनये प्रतिभा द्विविधा - कारयित्री भावयित्री चेति।

१६. व्युत्पत्तिः नाम उचितानुचितविवेकः।

१७. अभ्यासः नाम निरन्तरं ग्रन्थस्याध्ययने संरचने वा व्युत्पत्तिः।

१८. प्रतिभा अभ्यासः व्युत्पत्तिश्च काव्यस्य कारणानि मम्मटनये।

१९. वस्तुतः प्रतिभा काव्यस्य कारणम्।

उत्तराणि-३

२०. सहृदयलक्षणं तावत् -
"येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयविषयतन्मयीभवनयोग्यता ते एव हृदयसंवादभाजः सहृदयाः।" इति।

२१. सरस्वत्याः तत्त्वद्वयं कविः सहृदयश्च।

२२. सहृदयः भावयित्रीप्रतिभावान्।

२३. सहृदयस्य भावकः भावुकः रसिकः सचेताः इत्यादीनि नामान्तराणि।

उत्तराणि-४

२४. काव्यशब्दे कविशब्दः ष्यञ्प्रत्ययश्च।

२५. काव्यशब्दनिष्पत्तौ "गुणवचनब्राह्मणदिभ्यः कर्म च" इति सूत्रम्।

२६. अग्निपुराणोक्तं काव्यलक्षणं तु -

"संक्षेपाद् वाक्यमिष्टार्थव्यवच्छिन्ना पदावली।

काव्यं स्फुरदलङ्कारं गुणवद्दोषवर्जितम्॥" इति।

२७. दण्डिप्रोक्तं काव्यलक्षणं तु - "शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली।" इति।

२८. भामहप्रोक्तं काव्यलक्षणं तु - "शब्दार्थौ सहितौ काव्यम्" इति।

२९. आनन्दवर्धनोक्तं काव्यलक्षणं तु - "सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्षणम्" इति।

३०. जगन्नाथोक्तं काव्यलक्षणं तु - "रमणीयार्थप्रतिपादकः शब्दः काव्यम्" इति।

३१. मम्मटस्य काव्यलक्षणं तु - "तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि" इति

३२. विश्वनाथस्य काव्यलक्षणं तु - "वाक्यं रसात्मकं काव्यम्" इति।

३३. वाक्यलक्षणं दर्पणनये तु - "वाक्यं स्याद्योगताकाङ्क्षासत्तियुक्तः पदोच्चयः।" इति।

३४. पदलक्षणं दर्पणनये तु "वर्णाः पदं प्रयोगार्हानन्वितैकार्थबोधकाः।" इति।

३५. आकाङ्क्षा तु पदानां पदान्तरसापेक्षता भवति आकाङ्क्षा।

३६. योग्यता तु पदार्थानां परस्परसम्बन्धे बाधाभावः

३७. आसत्तिर्नाम पदार्थोपस्थितेः अव्यवधानम्।

उत्तराणि-५

३८. मम्मटाचार्यनये काव्यप्रयोजनं तु -

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।

सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥" इति॥

३९. विश्वनाथनये काव्यप्रयोजनं तु -

"चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।

काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते॥" इति।

४०. काव्यात् भगवन्नारायणादीनां पूजनेन शिवेतरक्षतिः भवति।

४१. भामहाचार्यनये तु

"धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।

करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्॥" इति।

४२. अग्निपुराणे काव्यविषये उक्तं तु -

"नरत्वं दुर्लभं लोके विद्या तत्र सुदुर्लभा।

कवित्वं दुर्लभं लोके शक्तिस्तत्र सुदुर्लभा॥" इति।

४३. काव्यस्य प्रयोजनद्वयं तु पुरुषार्थबोधः रसास्वादश्च।

४४. काव्यस्य सर्वापेक्षया रसास्वादः मुख्यं प्रयोजनम्। तत्र च प्रमाणं तु -

"काव्ये रसयिता सर्वो न बोद्धा न नियोगभाक्।" इति महिमभट्टस्य वचः।

उत्तराणि-६

४५. शब्दः त्रिविधः - वाचकः लक्ष्यकः व्यञ्जकश्च।

४६. अर्थः त्रिविधः - वाच्यो लक्ष्यो व्यङ्ग्यश्च।

४७. शब्दनिष्ठः अर्थबोधको व्यापारविशेषो भवति वृत्तिः।

४८. वृत्तेः त्रयो भेदाः - अभिधा लक्षणा व्यञ्जना चेति।

४९. अभिधालक्षणं तु -"तत्र सङ्केतितार्थस्य बोधनादग्रिमाभिधा।" इति।

५०. गदाधरनये सङ्केतः - "इदं पदमिमम् अर्थं बोधयतु इति अस्मात्पदाद् अयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः" इति।

५१. सङ्केतः जातौ गुणद्रव्यक्रियादिषु गृह्यते।

५२. लक्षणास्वरूपं तु - "मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते। रूढेः प्रयोजनाद्वासौ लक्षणा शक्तिरर्पिता॥" इति।

५३. रूढिमूलाया लक्षणायाः कलिङ्गः साहसिकः इत्युदाहरणम्।

५४. प्रयोजनमूलाया लक्षणायाः गङ्गायां घोषः इत्युदाहरणम्।

५५. उपादानलक्षणाया लक्षणं तु -

"मुख्यार्थस्येतराक्षेपो वाक्यार्थेऽन्वयसिद्धये।
स्यादात्मनोऽप्युपादानादेषोपादानलक्षणा॥" इति।

५६. लक्षणलक्षणाया लक्षणं तु -

"अर्पणं स्वस्य वाक्यार्थे परस्यान्वयसिद्धये।
उपलक्षणहेतुत्वादेषा लक्षणलक्षणा॥" इति।

५७. उपादानलक्षणायाः श्वेतो धावतीत्युदाहरणम्।

५८. लक्षणलक्षणायाः गङ्गायां घोषः इत्युदाहरणम्।

५९. व्यञ्जनास्वरूपं दर्पणे -

"विरतास्वभिधाद्यासु ययार्थो बोध्यते परः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च॥" इति।

६०. व्यञ्जना सामान्यतः द्विविधा अभिधामूला व्यञ्जनामूला चेति।

६१. शक्तिनियामकप्रतिपादिकं कारिकाद्वयं तु-

योगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः॥
सामर्थ्यमौचिती देशो कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः॥ इति।

उत्तराणि-७

६२. रससूत्रं तु - "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति।

६३. रसस्य चत्वारो वादाः - रसः उत्पद्यते इति भट्टलोल्लटस्य उत्पत्तिवादः, रसः अनुमीयते इति

श्रीशङ्कुकस्य अनुमितिवादः, रसः भुज्यते इति भट्टनायकस्य भुक्तिवादः, रसः अभिव्यज्यते इति अभिनवगुप्तस्य अभिव्यक्तिवादः।

६४. विभावलक्षणं तु - रत्याद्युद्बोधकाः लोके विभावाः काव्यनाट्ययोः।इति।

६५. अनुभावलक्षणं तु -

उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन्।

लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः॥ इति।

६६. व्यभिचारिभावस्य लक्षणं तु - स्थिरतया वर्तमाने हि रत्यादौ निर्वेदादिः प्रादुर्भावतिरोभावाभ्याम् आभिमुख्येन चरति इति व्यभिचारिभावः भवति।

६७. रसविषये अभिनवगुप्तस्य अभिव्यक्तिवादः सर्वापेक्षया श्रेष्ठः।

६८. अभिनवगुप्तमते तु रससूत्रस्यार्थः - विभावानुभावव्यभिचारिणां संयोगात् स्थायिभावस्य रसात्मना अभिव्यक्तिः इति।

६९. दर्पणोक्ता रसाभिव्यक्तिकारिका तु -

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा।

रसतामेति रत्यादिः स्थायिभावः सचेतसाम्॥" इति।

७०. रसास्वादकारिका तु -

"सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।

वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।

लोकोत्तरचमत्कारप्राणः कैश्चित्प्रमातृभिः

स्वाकारवदभिन्नत्वेनायमास्वाद्यते रसः॥" इति।

७१. साधारणीकरणव्यापारेण विभावादयः निर्विशेषा भवन्ति।

७२. रतिशोकादिभावः रसत्वप्राप्तेः पूर्वपर्यन्तं स्थिरत्वेन एव तिष्ठति। अतः रतिशोकादिभावः स्थायिभावः इत्युच्यते लोके।

७३. स्थायिभावाः तावत् -

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा।

जुगुप्सा विस्मयश्चेत्थमष्टौ प्रोक्ताः शमोऽपि च॥" इति।

७४. जगन्नाथस्य रसलक्षणं तु भग्नावरणा चिदेव रसः।

७५. नव रसाः भवन्ति -

"शृङ्गारहास्यकरुणा रौद्रवीरभयानकाः।

बीभत्सोऽद्भुत इत्यष्टौ शान्तोऽपि नवमो रसः॥" इति।

७६. शृङ्गारहास्यकरुणरसानां यथाक्रमं विष्णुः प्रमथगणः यमश्च देवता।

७७. शृङ्गारहास्यकरुणरसानां यथाक्रमं श्यामः श्वेतः कपोतश्च वर्णाः।

७८. रौद्रवीरभयानकानां यथाक्रमं रुद्रः महेन्द्रः कालश्च देवता।

७९. रौद्रवीरभयानकानां यथाक्रमं रक्तः हेमवर्णः कृष्णश्च वर्णाः।

८०. बीभत्साद्भुतशान्तानां यथाक्रमं महाकालः गन्धर्वः नारायणः च देवता।

८१. बीभत्साद्भुतशान्तानां यथाक्रमं नीलः पीतः अतिधवलश्च वर्णाः।

॥ इति नवमः पाठः ॥